Ganapathi Gakara Ashtottara Shatanama Stotram Lyrics in Devanagari PDF

गकाररूपो गम्बीजो गणेशो गणवन्दितः ।

गणनीयो गणोगण्यो गणनातीत सद्गुणः ॥ 1 ॥

गगनादिकसृद्गङ्गासुतोगङ्गासुतार्चितः ।

गङ्गाधरप्रीतिकरोगवीशेड्योगदापहः ॥ 2 ॥

गदाधरनुतो गद्यपद्यात्मककवित्वदः ।

गजास्यो गजलक्ष्मीवान् गजवाजिरथप्रदः ॥ 3 ॥

गञ्जानिरत शिक्षाकृद्गणितज्ञो गणोत्तमः ।

गण्डदानाञ्चितोगन्ता गण्डोपल समाकृतिः ॥ 4 ॥

गगन व्यापको गम्यो गमानादि विवर्जितः ।

गण्डदोषहरो गण्ड भ्रमद्भ्रमर कुण्डलः ॥ 5 ॥

गतागतज्ञो गतिदो गतमृत्युर्गतोद्भवः ।

गन्धप्रियो गन्धवाहो गन्धसिन्धुरबृन्दगः ॥ 6 ॥

गन्धादि पूजितो गव्यभोक्ता गर्गादि सन्नुतः ।

गरिष्ठोगरभिद्गर्वहरो गरलिभूषणः ॥ 7 ॥

गविष्ठोगर्जितारावो गभीरहृदयो गदी ।

गलत्कुष्ठहरो गर्भप्रदो गर्भार्भरक्षकः ॥ 8 ॥

गर्भाधारो गर्भवासि शिशुज्ञान प्रदायकः ।

गरुत्मत्तुल्यजवनो गरुडध्वजवन्दितः ॥ 9 ॥

गयेडितो गयाश्राद्धफलदश्च गयाकृतिः ।

गदाधरावतारीच गन्धर्वनगरार्चितः ॥ 10 ॥

गन्धर्वगानसन्तुष्टो गरुडाग्रजवन्दितः ।

गणरात्र समाराध्यो गर्हणस्तुति साम्यधीः ॥ 11 ॥

गर्ताभनाभिर्गव्यूतिः दीर्घतुण्डो गभस्तिमान् ।

गर्हिताचार दूरश्च गरुडोपलभूषितः ॥ 12 ॥

गजारि विक्रमो गन्धमूषवाजी गतश्रमः ।

गवेषणीयो गमनो गहनस्थ मुनिस्तुतः ॥ 13 ॥

गवयच्छिद्गण्डकभिद्गह्वरापथवारणः ।

गजदन्तायुधो गर्जद्रिपुघ्नो गजकर्णिकः ॥ 14 ॥

गजचर्मामयच्छेत्ता गणाध्यक्षोगणार्चितः ।

गणिकानर्तनप्रीतोगच्छन् गन्धफली प्रियः ॥ 15 ॥

गन्धकादि रसाधीशो गणकानन्ददायकः ।

गरभादिजनुर्हर्ता गण्डकीगाहनोत्सुकः ॥ 16 ॥

गण्डूषीकृतवाराशिः गरिमालघिमादिदः ।

गवाक्षवत्सौधवासीगर्भितो गर्भिणीनुतः ॥ 17 ॥

गन्धमादनशैलाभो गण्डभेरुण्डविक्रमः ।

गदितो गद्गदाराव संस्तुतो गह्वरीपतिः ॥ 18 ॥

गजेशाय गरीयसे गद्येड्योगतभीर्गदितागमः ।

गर्हणीय गुणाभावो गङ्गादिक शुचिप्रदः ॥ 19 ॥

गणनातीत विद्याश्री बलायुष्यादिदायकः ।

एवं श्रीगणनाथस्य नाम्नामष्टोत्तरं शतम् ॥ 20 ॥

पठनाच्छ्रवणात् पुंसां श्रेयः प्रेमप्रदायकम् ।

पूजान्ते यः पठेन्नित्यं प्रीतस्सन् तस्यविघ्नराट् ॥ 21 ॥

यं यं कामयते कामं तं तं शीघ्रं प्रयच्छति ।

दूर्वयाभ्यर्चयन् देवमेकविंशतिवासरान् ॥ 22 ॥

एकविंशतिवारं यो नित्यं स्तोत्रं पठेद्यदि ।

तस्य प्रसन्नो विघ्नेशस्सर्वान् कामान् प्रयच्छति ॥ 23 ॥

॥ इति श्री गणपति गकार अष्टोत्तर शतनामस्तोत्रम् ॥

Text Source vignanam.org
PDF file is generated [October 11, 2015] at Stotram Website